सुवानो याति कविक्रतुः ॥ ९.००९.०१ ॥
प्र-प्र क्षयाय पन्यसे जनाय जुष्टो अद्रुहे ।
वीत्य् अर्ष चनिष्ठया ॥ ९.००९.०२ ॥
स सूनुर् मातरा शुचिर् जातो जाते अरोचयत् ।
महान् मही ऋतावृधा ॥ ९.००९.०३ ॥
स सप्त धीतिभिर् हितो नद्यो अजिन्वद् अद्रुहः ।
या एकम् अक्षि वावृधुः ॥ ९.००९.०४ ॥
ता अभि सन्तम् अस्तृतम् महे युवानम् आ दधुः ।
इन्दुम् इन्द्र तव व्रते ॥ ९.००९.०५ ॥
अभि वह्निर् अमर्त्यः सप्त पश्यति वावहिः ।
क्रिविर् देवीर् अतर्पयत् ॥ ९.००९.०६ ॥
अवा कल्पेषु नः पुमस् तमांसि सोम योध्या ।
तानि पुनान जङ्घनः ॥ ९.००९.०७ ॥
नू नव्यसे नवीयसे सूक्ताय साधया पथः ।
प्रत्नवद् रोचया रुचः ॥ ९.००९.०८ ॥
पवमान महि श्रवो गाम् अश्वं रासि वीरवत् ।
सना मेधां सना स्वः ॥ ९.००९.०९ ॥

ओ चित् सखायं सख्या ववृत्यां तिरः पुरू चिद् अर्णवं जगन्वान् ।
पितुर् नपातम् आ दधीत वेधा अधि क्षमि प्रतरं दीध्यानः ॥ १०.०१०.०१ ॥
न ते सखा सख्यं वष्ट्य् एतत् सलक्ष्मा यद् विषुरूपा भवाति ।
महस् पुत्रासो असुरस्य वीरा दिवो धर्तार उर्विया परि ख्यन् ॥ १०.०१०.०२ ॥
उशन्ति घा ते अमृतास एतद् एकस्य चित् त्यजसम् मर्त्यस्य ।
नि ते मनो मनसि धाय्य् अस्मे जन्युः पतिस् तन्व १.म् आ विविश्याः ॥ १०.०१०.०३ ॥
न यत् पुरा चकृमा कद् ध नूनम् ऋता वदन्तो अनृतं रपेम ।
गन्धर्वो अप्स्व् अप्या च योषा सा नो नाभिः परमं जामि तन् नौ ॥ १०.०१०.०४ ॥
गर्भे नु नौ जनिता दम्पती कर् देवस् त्वष्टा सविता विश्वरूपः ।
नकिर् अस्य प्र मिनन्ति व्रतानि वेद नाव् अस्य पृथिवी उत द्यौः ॥ १०.०१०.०५ ॥
को अस्य वेद प्रथमस्याह्नः क ईं ददर्श क इह प्र वोचत् ।
बृहन् मित्रस्य वरुणस्य धाम कद् उ ब्रव आहनो वीच्या नॄन् ॥ १०.०१०.०६ ॥
यमस्य मा यम्य १.ं काम आगन् समाने योनौ सहशेय्याय ।
जायेव पत्ये तन्वं रिरिच्यां वि चिद् वृहेव रथ्येव चक्रा ॥ १०.०१०.०७ ॥
न तिष्ठन्ति न नि मिषन्त्य् एते देवानां स्पश इह ये चरन्ति ।
अन्येन मद् आहनो याहि तूयं तेन वि वृह रथ्येव चक्रा ॥ १०.०१०.०८ ॥
रात्रीभिर् अस्मा अहभिर् दशस्येत् सूर्यस्य चक्षुर् मुहुर् उन् मिमीयात् ।
दिवा पृथिव्या मिथुना सबन्धू यमीर् यमस्य बिभृयाद् अजामि ॥ १०.०१०.०९ ॥
आ घा ता गच्छान् उत्तरा युगानि यत्र जामयः कृणवन्न् अजामि ।
उप बर्बृहि वृषभाय बाहुम् अन्यम् इच्छस्व सुभगे पतिम् मत् ॥ १०.०१०.१० ॥
किम् भ्रातासद् यद् अनाथम् भवाति किम् उ स्वसा यन् निर्ऋतिर् निगच्छात् ।
काममूता बह्व ए ३ तद् रपामि तन्वा मे तन्व १.ं सम् पिपृग्धि ॥ १०.०१०.११ ॥